## सर्वोत्तमपरिपाटी-1

**(i)**प्रकाशनानि

तमसा आवृतायामिव कोरोनामहामारीग्रस्तायामपि परिस्थितौ विश्वविद्यालयोऽसौ दृढव्रतः सरल-संस्कृतभाषया पञ्चमहाकाव्यानां सरलव्याख्यानरचनायै कुलाधिपतिभिः विहितसंस्कृतरतिभिरादिष्टे पथि

(a) नैषध-रघुवंश-शिशुपालवध-महाकाव्यानि प्राचीकशत् । वैज्ञानिकतालपत्रग्रन्थस्थान् विषयान् प्रकाश्य समाजाय समर्पयितुं कृतप्रयत्नेन अस्मद्विश्वविद्यालयेन गणितशास्त्रे कुट्टकाख्यो ग्रन्थः आगमेषु “Architectural Engineering and Iconography in Vaishnava and Saiva Agama” इति ग्रन्थश्च प्राकाश्यं नीतः । ‘‘औषधकल्पः, चिकित्सारससङ्ग्रहः’’ इति नामभ्यां ग्रन्थद्वयम् अचिरादेव प्राकाश्यं नेष्यते ।

(b) शास्त्राध्ययनं चिकीर्षूणाम् अल्पविद्यापरिग्रहाणां बालानां सुखबोधाय मीमांसा-व्याकरण-साहित्याद्वैत-ज्योतिषशास्त्रप्रकाशकाः ग्रन्थाः प्रकाशितास्सन्तः तदधीतिभिः, विद्वद्भिश्च भृशं समाद्रियन्ते, केषुचिद् विश्वविद्यालयेषु पाठ्यपुस्तकत्वेनापि समस्थाप्यन्त । भारतीयज्ञान-प्रणालीद्योतनाय ‘‘Indian Knowledge Systems’’ इति पाठ्यक्रमोऽपि निर्मीयमाणो विभाति।

(c) पारम्परिकगुरुकुलपद्धत्या निशितशास्त्राध्ययनाय ‘‘परमाचार्यशास्त्रपरिरक्षणकेन्द्र’’नाम्ना गुरुकुलं समारब्धं, यत्रेदानीम् अद्वैत-न्यायशास्त्रयोः अध्ययनव्यवस्था समुपाकल्पि । सर्वकारीयसंस्थासु साम्प्रतं पारम्परिकपद्धत्या शास्त्राध्ययनव्यवस्था केवलमस्मद्विश्वविद्यालये प्रचलतीति कथयितुमहं गर्वमनुभवामि ।

## सर्वोत्तमपरिपाटी-2

**(ii)**अन्तर्जालपाठ्यक्रमाः

बालेषु मानवीयमूल्यानां वर्धनाय गतत्रिवर्षेभ्यः विधीयमानाः प्रयत्नाः फलदाः जाता इत्यानन्दकरो विषयः। बालानां सरलसंस्कृतबोधनाय निर्मितानि षट्त्रिंशत्सङ्ख्याकानि “बालकेन्द्राणि” यद्यपि कोरोनामहामारीवशात्स्थगितानि, अथापि अन्तर्जालमाध्यमेन

“बालगोकुल”नाम्ना सञ्चाल्यमानानि पञ्चदशदेशेभ्यः छात्राणां समावर्जनेन अनिरीक्षितानि वरप्रसादभूतानि संवृत्तानि । अत्र अधीयानाः छात्राः मानवीयमूल्यानि तथा संस्कृते उत्तमोत्तमं सम्प्रेषणकौशलञ्च प्राप्नुवन्तस्सन्ति ।

गतसंवत्सरात् सार्धैकवर्षावधावेव (April 2020 to June 2021) अष्टपञ्चाशत् (58) अन्तर्जालपाठ्यक्रमाः बाह्यच्छात्राणां कृते आयोजिषत, यत्र ऊनविंशत्यधिकत्रिशतोत्तर-चतुस्सहस्रसङ्ख्याकाः (4319) छात्राः निजाध्ययनेन आत्मनः धन्यान् व्यधुः । अस्मिन् शैक्षिकसंवत्सरेऽपि (जुलै 2021 तः) ऊनविंशतेः विदेशानां छात्राः 1400 सङ्ख्याकाः अधीयाना बोभूयन्ते । एभिरन्तर्जालीयपाठ्यक्रमप्रकल्पैः विश्वविद्यालयोऽयं निश्चप्रचम् अन्ताराष्ट्रियस्तरमध्यगच्छदिति निवेदयामि।

विश्वविद्यालयेन ऐषमः राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा क्रियमाणाय मूल्याङ्कनाय प्रयत्नो विधीयमानो भवति । दिसम्बर् मासि समर्पणाय स्वाध्ययनप्रतिवेदनम् (SSR) सिद्धं भविष्यतीति तदर्थमनवरतं यायत्यमानाः भवामः, अवश्यं A++ अङ्केन प्रत्यायनं भविष्यतीति दृढं विश्वसिमश्च ।